# 2023-24

***Time - 3 hours***

***Full Marks - 80***

*Answer **all units** as per instructions.*
*Figures in the right hand margin indicate marks.*
*Candidates are required to answer*
*in their own words as far as practicable.*

## UNIT - I

1. कस्यचित् द्वयस्यः सप्रसङ्गं व्याख्या कुरुत । [10 × 2

(क) अतिरूपात् हृता सीता ह्यतिगर्वेण रावणः ।
अतिदानाद् बलिर्वधो ह्याति सर्वत्र वर्जयेत् ।।

(ख) मूर्ख शिष्योपदेशेन दुष्टस्त्रीभरणेन च ।
दुःखितैः सम्प्रयोगेन पण्डितोऽप्यवसीदति ।।

(ग) निर्धनं पुरुषं वेश्या प्रजा भग्नं नृपं त्यजेत् ।
खगा वीतफलं वृक्षं भुक्त्वा चाभ्यगता गृहम् ।।

## UNIT - II

2. उत्कलभाषया आंगलोभाषया वा चतुर्णां अनुवादं कुरुत । [5 × 4

(क) धर्मार्थ काममोक्षाणां यस्यैकोऽपि न विद्यते ।
जन्मजन्मानि मर्त्येषु मरणं तस्य केवलम् ।।

(ख) गृहित्वा दक्षिणां विप्रास्त्यजन्ति यजमानकम् ।
प्राप्तविद्या गुरुं शिष्याः दग्धरण्यं मृगस्तथा ।।

(ग) वरयेत् कुलजां प्राज्ञो विरूपामपि कन्यकाम् ।
रूपवतीं न नीचस्य विवाहः सदृशे कुले ।।

(घ) अपुत्रस्य गृहं शून्यं दिशः शून्यास्त्वाबान्धवाः ।
मूर्खस्य हृदयं शून्यं सर्वशून्या दरिद्रता ।।

(ङ) शैले शैले न माणिक्यं मौक्तिकं न गजे गजे ।
साधवो न हि सर्वत्र चन्दनं न वने वने ।।

(च) प्रलये भिन्नमर्यादा भवन्ति किल सागराः ।
सागराः भेदमिच्छन्ति प्रलयेऽपि न साधवः ।।

**UNIT - III**

3. केषांचित् <u>त्रयाणां</u> सप्रसङ्गं व्याख्या कुरुत । [10 × 3

(क) दानं भोगो नाशास्तिस्त्रो गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुक्ते तस्य तृतीया गत्तिर्भवति ।।

(ख) लभेत सिकतासु तैलमपि यत्नतः पीड़यन्
पिवेच्च मृगातृष्णिकासु सलिलं पिपासार्दितः ।
कदाचिदपि पर्यटन शशविषाणमासादयेत्
न तु प्रतिनिविष्ट मूर्खजनवचित्तमाराधयेत् ।।





(ग) जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः ।
नास्ति येषां यशः काये जरामरणजं भयम् ।।

(घ) त्वमेव चातकाधारोसीति केषां न गोचरः ।
किमम्भोदवरास्माकं कार्पण्योक्तिं प्रतिक्षते ।।

(ङ) वरं पर्वतदुर्गेषु भ्रन्तं वनचरैः सह ।
न मूर्खजनसंपर्कः सुरेन्द्रभवनेष्वपि ।।

4. उत्कलभाषया आङ्गलभाषया वा <u>द्वयस्य</u> अनुवादं कुरुत । [5 × 2

(क) सत्याऽनृता च पुरुषा प्रियवादिनी च
हिंस्रा दयालुरपि चाऽर्थपरा वदान्या ।
नित्यव्यया प्रचुरनित्यधनागमा च
वाराङ्गनेव नृपनीतिरनेकरूपा ।।

(ख) विद्यानाम नरस्य रूपमधिकम् प्रच्छन्नगुप्तं धनं
विद्याभोगकरी यशः सुखकरी विद्या गुरुणां गुरुः ।
विद्यावन्धुजनो विदेशगमने विद्यापरां देवता
विद्या राजसु पूजिता न तु धनं विद्याविहीनः पयुः ।।

(ग) प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमजना न परित्यजन्ति ।।

(घ) लाङ्गलचालनमधश्चरणावपातं

भूपौ निपत्य वदनोदरदर्शनं च ।

श्वा पिण्डदस्य कुरुते गजपुङ्गवस्तु

धीरं विलोकयति चाटुभतैश्च ।।